**दृश्** त्रि० कस्मिंश्चिदुपपदे दृश–क्विन् झलि पदान्ते च कुः। १तत्तत्पदार्थदर्शके “वायुभक्षो दिवा तिष्ठन् रात्रिं नीत्वाप्सु सूर्यदृक्” याज्ञ० “ऐन्द्रद्युम्ने! यज्ञदृशा- विहायां विचक्षू वै जनकेन्द्रं दिदृक्षू” भा०व०१०६२४श्लो० अनुपपदेऽपि क्विन्। २द्रष्टरि “दृग्दर्शनशक्त्योरेकात्मते- वास्मिता” पात०सू०। भावे क्विन्। ३दर्शने ४ज्ञानमात्रे च स्त्री “प्रतिबन्धदृशः प्रतिबद्धज्ञानमनुमानम्” सा०सू० “प्रतिबन्धोव्याप्तिर्व्याप्तिदर्शनात् व्यापकज्ञानमनुमानम्” भाष्यम्। करणे क्विन्। ५नेत्रे स्त्री “दृशा दग्धं मन- सिजं जीवयन्ति दृशैव याः” सा०द०। “नेत्रकोपदहनार्चिषं ततः सन्दधे दृशमुदग्रतारकाम्” रघुः ६द्वित्व- संख्यायाञ्च।

**दृशति** स्त्री दृश–बा० भावे अतिक्। दर्शने “स्वरो न यस्य दृशतिररेपाः” ऋ० ६।३।२ “दृशतिर्दर्शनम्” भा०

**दृशद्** स्त्री दृषद्+पृषो०। शिलायाममरे पाटान्तरम् “तथा दृशत्पुत्रञ्च” गोभिलः “दृशत् पेषणाधारशिला, पुत्रं पेषणकरणरूपप्रस्तरस्तदुभयं पूर्ववदुपसादयतीत्यर्थः” सं०त० रघु०।

**दृशद्वती** स्त्री दृषद्वती+पृषो०। १आर्य्यावर्त्तसीमास्थे नदी- भेदे २कात्यायन्याञ्च मेदि०।

**दृशा** स्त्री दृश्+हलन्तत्वात् वा टाप्। नेत्रे शब्दच० दृशा- [काङ्क्ष्यम्।

**दृशाकाङ्क्ष्य** त्रि० दृशया आकाङ्क्ष्यम्। पद्मे शब्दच०।

**दृशान** पु० दृश–आनच् किच्च। १लोकपाले उज्ज्वल० २विरोचने पु० ३ज्योतिषि न० मेदि०। ४आचार्ये पु० उणादिकोषः। ५ब्राह्मणे ६उपाध्याये च पु० संक्षिप्तसारः।

**दृशि(शी)** स्त्री दृश–भावे कि वा ङीप्। १दृष्टौ २प्रकाशे च “द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः” पात०सू०। “दृशिमात्र इति दृक्शक्तिरेव विशेषणेन परामृष्टेत्यर्थः। स पुरुषो बुद्धेः प्रतिसंवेदी बुद्धेर्न सरूपोनात्यन्तं विरूप इति न तावत् सरूपः कस्मात्? ज्ञाताज्ञातविषयत्वात् परिणामिनी हि बुद्धिस्तस्याश्च विषयोगवादिर्घटादि ज्ञातश्चाज्ञातश्चेति परिणामित्वं दर्शयति। कस्मात्? न हि बुद्धिश्च नाम पुरुषविषयश्च स्यादगृहीता चेति सिद्धं पुरुषस्य सदा ज्ञातविषयत्वं ततश्चापरिणामित्व- मिति। किञ्च परार्था बुद्धिः संहत्यकारित्वात् स्वार्थः पुरुष इति। तथा सर्वार्थाध्यवसायकत्वात् त्रिगुणा बुद्धिस्त्रिगुणत्वादचेतनेति गुणानान्तूपद्रष्टा पुरुष इत्यतो न सरूपः। अस्तु तर्हि विरूप इति नात्यन्तं विरूपः, कस्मात्? शुद्धोऽप्यसौ पश्यन्नतदात्मापि तदात्मक इव प्रत्यवभासते। तथा चोक्तम् अपरिणामिनी हि भोक्तृशक्तिरप्रतिसंक्रमा च परिणामिन्यर्थे प्रतिसंक्रान्तेव तद्- वृत्तिमनुपतति। तस्याश्च प्राप्तचेतनानुग्रहरूपाया बुद्धिवृत्तेरनुकारमात्रतया बुद्धिवृत्त्यविशिष्टा हि ज्ञान- वृत्तिरित्याख्यायते” भा०। सूर्यप्रकाशयोरिव द्रष्टृदृशोर्- धर्मधर्मिणोरैक्यात् ३चेतने पुरुषे च “दृशिस्वरूपो गगनोपमोमनः”। “तदभावात् संयोगाभावोहानं तद् दृशेः कैवल्यम्” पात०सू० “मिथ्यादर्शनस्याभावात् बुद्धिपुरु- षसंयोगाभावः आत्यन्तिको बन्धनोपरम इत्यर्थः एतद्धानं तद् दृशेः कैवल्यं पुरुषस्यामिश्रीभावः पुनरसंयोगो गुणैरित्यर्थः। दुःखकारणनिवृत्तौ दुःखोपरमो हानं तदा स्वरूपप्रतिष्ठः पुरुष इत्युक्तम्” भा० दृश–इक्। ४दृशधातौ “दृशेरनालोचने कङ् च” पा०

**दृशीक** त्रि० दृश–कर्मणि बा० ईकक्। १दर्शनीये २शोभने च “स्तोमं रुद्राय दृशीकम्” ऋ० १।२७।१० “दृशीकं दर्श- नीयं समीचीनम्” भा०

**दृशेन्य** त्रि० दृश–कर्मणि केन्यन्। दर्शनीये “दृशेन्यो महिना समिद्धः” ऋ० १०।८८।७ “दृशेन्यः दर्शनीयः” भा०

**दृशोपम** न० दृशाया उपमा यत्र। श्वेतपद्मे शब्दमाला।

**दृश्य** त्रि० दृश–कर्मणि क्यप्। १दर्शनीये २मनोरमे च “चित्रं तदा कुण्डिनवेशिनः सा नलस्य मूर्त्तिर्ववृते न दृश्या। बभूव तच्चित्रतरन्तथापि विश्वैकदृश्यैव यदस्य मूर्त्तिः”। “आस्तामनङ्गीकरणाद्भवेन दृश्यः स्मरो नेति पुराणवाणी” नैष० “तमेकदृश्यं नयनैः पिबन्त्योनार्यो न जग्मुर्विषयान्तराणि” कुमा० “निदर्शयामास विशेष- दृश्यमिन्दुं नवोत्थानमिव” रघुः। ३ज्ञेयमात्रे ४प्रकाश्ये च “द्रष्टृदृश्ययोः संयोगो हेयहेतुः” पात०सू० “द्रष्टा बुद्धेः प्रतिसंवेदी पुरुषः, दृश्या बुद्धिसत्त्वोपारूढा सर्वे धर्माः, तदेतद् दृश्यमयस्कान्तमणिकल्पं सन्नि- धिमात्रोपकारि दृश्यत्वेन स्वम्भवति पुरुषस्य दृशि- रूपस्य स्वामिनः। अनुभवकर्मविषयतामापन्नमन्यस्वरू- पेण प्रतिलब्धात्मकं स्वतन्त्रमपि तदर्थत्वात् परतन्त्रम् उभयोर्दृग्दर्शनशक्त्योरनादिरर्थकृतः संयोगो हेयहेतुर्दुःखस्य कारणमित्यर्थः” भा० “प्रकाशक्रियास्थिति शीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम्” पात०सू० “प्रकाशशीलं सत्वं, क्रियाशीलं रजः। स्थितिशीलं तम इति एते गुणाः परस्परोपरक्तप्रविभागाः परिणा-